# Shri Lalita Hridaya Stotram 2

# श्रीललिताहृदयस्तोत्रम् २

## Document Information


Text title : lalitAhRRidayastotram 2

File name : lalitAhRRidayastotram2.itx

Category : hRidaya, devii, dashamahAvidyA, lalitA, devI

Location : doc_devii

Transliterated by : RamaPrakasha ramaprakashak at gmail.com

Proofread by : RamaPrakasha ramaprakashak at gmail.com

Description/comments : Shri Vidya Stava Manjari - Kulbhushan Pandit Ramadutta Shukla

Latest update : December 26, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# श्रीललिताहृदयस्तोत्रम् २

॥ पूर्व-पीठिका ॥

अगस्त्य उवाच -
हयग्रीव ! दया-सिन्धो ! ललितायाः शुभं मम ।
हृदयं च महोत्कृष्टं कथयस्व महा-मुने ॥ १॥

हयग्रीव उवाच-
शृणु त्वं शिष्य ! वाक्यं मे हृदयं कथयामि ते ।
महा-देव्यास्तथा शक्तेः प्रीति-सम्पाद-कारकम् ॥ २॥

बीजात्मकं महा-मन्त्र-रूपकं परमं निजम् ।
कामेश्वर्याः स्वाङ्ग-भूतं डामर्यादिभिरावृतम् ॥ ३॥

कामाकर्ष्यादि-संयुक्तं पञ्च-काम-दुघान्वितम् ॥

नव-वल्लि-समायुक्तं कादि-हादि-मतान्वितम् ॥ ४॥

त्रिकूट-दर्शितं गुप्तं हृदयोत्तममेव च ।
मूल-प्रकृति-व्यक्तादि-कला-शोधन-कारकम् ॥ ५॥

विमर्श-रूपकं चैव विद्या-शक्ति-षडङ्गकम् ।
षडध्व-मार्ग-पीठस्थं सौर-शाक्तादि-संज्ञकम् ॥ ६॥

अभेद-भेद-नाशं च सर्व-वाग्-वृत्ति-दायकम् ।
तत्त्व-चक्र-मयं तत्त्व-बिन्दु-नाद-कलान्वितम् ॥ ७॥

प्रभा-यन्त्र-समायुक्तं मूल-चक्र-मयान्वितम् ।
कण्ठ-शक्ति-मयोपेतं भ्रामरी-शक्ति-रूपकम् ॥ ८॥

विनियोगः -
ॐ अस्य श्रीललिता-हृदय-स्तोत्र-माला-मन्त्रस्य श्रीआनन्द-भैरव ऋषिः । अमृत-विराट् छन्दः । श्रीललिता-वाग्देवता-प्रसाद-सिद्धये

जपे विनियोगाय नमः ॥

ऋष्यादि-न्यासं कृत्वा कर-सम्पुटे कूट-त्रयं द्विरावृत्य षडङ्ग-द्वयं कुर्यात् ॥

ध्यानम् -
द्रां द्रीं क्लीं बीज-रूपे, हसित-कह-कहे, ब्रह्म-देहान्तरङ्गे !
ब्लूं सः क्रों वर्ण-माले, सुर-गण-नमिते, तत्त्व-रूपे ! हसखफ्रेम् ।
ह्सां ह्सीं ह्सौं बीज-रूपे, परम-सुख-करे, वीर-मातः ! स्वयम्भूः ।
ऐं सहखफ्रें बीज-तत्त्वे, कलित-कुल-कले ! ते नमः शुद्ध-वीरे ॥ १॥

इति ध्यात्वा, मनसा पञ्चधोपचर्य, नव-मुद्राः प्रदर्य,
मूलं त्रि-वारं जप्त्वा, योनिमुद्रया प्रणमेत् ॥

अथ हृदय-स्तोत्रम् ।

हृदयाम्बुज-मध्यस्था ब्रह्मात्मैक्य-प्रदायिनी ।
त्रिपुराम्बा त्रिकोणस्था पातु मे हृदयं सदा ॥ १॥

अवर्ण-मालिका शक्तिर्वर्णमाला-स्वरूपिणी ।
नित्याऽनित्या तत्त्वगा सा निराकार-मयान्विता ॥ २॥

शब्द-ब्रह्म-मयी शब्द-बोधाकार-स्वरूपिणी ।
सांविदी वादि-संसेव्या सर्व-श्रुतिभिरीडिता ॥ ३॥

महा-वाक्योपदेशानी स्वर-नाडी-गुणान्विता ।
ह्रीङ्कार-चक्र-मध्यस्था ह्रीमुद्यान-विहारिणी ॥ ४॥

ह्रीं मोक्ष-कारिणी ह्रीं ह्रीं, महा-ह्रीङ्कार-धारिणी ।
काल-कण्ठी महा-देवी कुरु-कुल्ला कुलेश्वरी ॥ ५॥

ऐं ऐं प्रकाश-रूपेण, ऐं बीजान्तर-वासिनी ।
ईशस्था ईदृशी चेशी ईं ईं वीज-करी तथा ॥ ६॥

लक्ष्मी-नारायणान्तःस्था लक्ष्यालक्ष्य-करी तथा ।
शिवस्था हेति-वर्णस्था स-शक्तेर्वर्ण-रूपिणी ॥ ७॥

कमलस्था कला-माला ह्रां ह्रीं ह्रीं ह्रीं मुखी तथा ।
लावण्य-सुन्दरी पातु लक्ष्य-कोणाग्रमन्विता ॥ ८॥

लां लां लीं लीं सुरैः स्तुत्या सां सीं सूं सैं सुरार्चिता ।
कां कीं कूं काकिनी सेव्या लां लीं लूं काकिनी-स्तुता ॥ ६॥

बिन्दु-चक्रेश्वरी पातु द्वितीया-वर्ण-देवता ।
वसु-कोणेश्वरी देवी द्वि-दशारेश्वरी च माम् ॥ १०॥

मन्वस्त्र-चक्र-मध्यस्था नाग-पत्रेश्वरी सदा ।
षोडशारेश्वरी नित्या मण्डल-त्रय-देवता ॥ ११॥

भूपुर-त्रय-मध्यस्था द्वादश-ग्रन्थि-भेदिनी ।
हंसी हसी सु-बीजस्था हरिद्रादिभिरर्चिता ॥ १२॥

अनन्त-कोटि-जन्मस्था जन्माजन्मत्व-वर्जिता ।
अमृताम्भोधि-मध्यस्था अमृतेशादि-सेविता ॥ १३॥

मृतामृत-करी मूल-विराट्-शक्तिः परात्मिका ।
आत्मनं पातु मे नित्यं तथा सर्वाङ्गमेव च ॥ १४॥

अष्ट-दिक्षु कराली सा ऊर्ध्वाधः-प्रान्तके तथा ।
गुरु-शक्ति-महा-विद्या गुरु-मण्डल-गामिनी ॥ १५॥

सर्व-चक्रेश्वरी सर्व-ब्रह्मादिभिः सु-वन्दिता ।
सत्त्व-शक्तिः रजः-शक्तिस्तमः-शक्तिः परात्मिका ॥ १६॥

प्रपञ्चेशी सु-कालस्था महा-वेदान्त-गर्भिता ।
कूटस्था कूट-मध्यस्था कूटाकूट-विवर्जिता ॥ १७॥

योगाङ्गी योग-मध्यस्था अष्ट-योग-प्रदायिनी ।
नव-शक्तिः कृती माता अष्ट-सिद्धि-स्वरूपिणी ॥ १८॥

नव-वीरावली रम्या मुक्ति-कन्या मुकुन्दगा ।
उपदेश-करी विद्या महा-मुख्य-विराजिता ॥ १९॥

मुख्याऽमुख्या महा-मुख्या मूल-बीज-प्रवर्तिका ।
दिक्-पालकाः सदा पान्तु श्रीचक्राधि-देवताः ॥ २०॥

दिग्-योगिन्यष्टकं पातु तथा भैरव चाष्टकम् ।
षडङ्ग-देवताः पान्तु नित्या-षोडशिकास्तथा ॥ २१॥

नाथ-शक्तिः सदा पातु त्रिकोणान्तर-दीपिका ।
त्रि-सारा त्रय-कर्माणि नाशिनी त्रयं दर्शति ॥ २२॥

त्रि-काला शोषणी शोष-कारिणी शोषणेश्वरी ।

भुक्ति-मुक्ति-प्रदा बाला भुवनाम्बा बगलेश्वरी ॥ २३॥ var बुधेश्वरी
अतृप्तिस्तृप्ति-सन्तुष्टा तृप्ता तृप्त-करी सदा ।
आम्नाय-शक्तयः पान्तु आदि-शेष-सु-तल्पिनी ॥ २४॥

राज्यत्वं देहि मे नित्यं आदि-शम्भु-स्वरूपिणी ।
सर्व-रोग-हरा सर्व-कैवल्य-पद-दायिनी ॥ २५॥

फल-श्रुतिः -
इदं तु हृदयं दिव्यं ललिता-प्रीति-दायकम् ।
अनेन च समं नास्ति स्तोत्रं प्रख्यात-वैभवम् ॥ २६॥

शक्ति-रूपं शक्ति-गुप्तं प्रकटाङ्गं प्रभुं शुभम् ।
मूल-विद्यात्मकं मूल-ब्रह्म-सम्भव-कारणम् ॥ २७॥

नादादि-शक्ति-संयुक्तमभूतमद्भुतं महत् ।
रोगहं पापहं विघ्न-नाशनं विघ्न-हारिणम् ॥ २८॥

चिरायुष्य-प्रदं सर्व-मृत्यु-दारिद्र्य-नाशनम् ।
क्रोधहं मुक्तिदं मुक्ति-दायकं परं मे सुखम् ॥ २६॥

रुद्रदं मृडपं विष्णुं दण्डकं ब्रह्म-रूपकम् ।
विचित्रं च सुचित्रं च सुन्दरं च सु-गोचरम् ॥ ३०॥

नाभक्ताय न दुष्टाय नाविश्वस्ताय देशिकः ।
न दापयेत् परं विद्या-हृदयं मन्त्र-गर्भितम् ॥ ३१॥

स्तोत्राणामुत्तमं स्तोत्रं मन्त्राणामुत्तमं मनुम् ।
बीजानामुत्तमं बीजं शाक्तानामुत्तमं शिवम् ॥ ३२॥

पठेद् भक्त्या त्रि-कालेषु अर्ध-रात्रे तथैव च ।
वाक्-सिद्धि-दायकं नित्यं पर-विद्या-विमोहकम् ॥ ३३॥

स्व-विद्या-स्थापकं चान्यद् यन्त्र-तन्त्रादि-भेदनम् ।
कृत्तिका-नक्षत्र-कूर्माख्ये चक्रे स्थित्वा जपेन्मनुम् ॥ ३४॥

इति श्रीमहत्तर-योनि-विद्याया महा-तन्त्रे श्रीललिता-हृदयं सम्पूर्णम् ॥

Encoded and proofread by RamaPrakasha ramaprakashak at gmail.com

*Shri Lalita Hridaya Stotram 2*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*